National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 85-87
© 2025 NJHSR
www.sanskritarticle.com

**श्री चन्द्रमौलि कल्याणः**
सहायकाचार्यः(अतिथिः),
व्याकरणविभागः,एकलव्यपरिसरः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
अगर्तला

**Correspondence:**
**श्री चन्द्रमौलि कल्याणः**
सहायकाचार्यः(अतिथिः),
व्याकरणविभागः,एकलव्यपरिसरः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
अगर्तला

# सप्रयोजनं व्याकरणाध्ययनम्

**श्री चन्द्रमौलि कल्याणः**

**शोधसारः –**
- ❖ व्याकरणसामान्यपारिचयः
- ❖ वेदाङ्गानां परिचयः
- ❖ व्याकरणशब्दविचारः
- ❖ शब्दस्य द्वैविध्यम्
- ❖ व्याकरणाध्ययनस्य किं प्रयोजनम्
- ❖ पञ्चमुख्यप्रयोजनानि
- ❖ अन्ते वक्तव्यम्

**कूटशब्दाः –** व्याकरणम्, प्रयोजनम्, अध्ययनम्, रक्षा, ऊहः, आगमः, लघु, असन्देहः, वेदः, वेदाङ्गम्।

**उपोद्घातः –**

अस्मिन् जगति जीवाः स्वस्वकर्मानुसारं विविधयोनिषु जन्म प्राप्नुवन्ति। अत्र वदन्ति "पूर्वकर्मानुगो जीवः"इति। पूर्वजन्मकृतं कर्म अनुभोक्तुं पुनः पुनः जन्म लभन्ते, तदुच्यते **"अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम्"**[1] इति। तस्य दुःखस्य परिहारं सर्वोऽपि जिज्ञासते। तदुक्तम् – **"दुःखत्रयाभिघातात् जिज्ञासा तदपघातके हेतौ"**[2] इति। एवं परमार्थलक्ष्यभूतं धर्मार्थकाममोक्षेति पुरुषार्थचतुष्टयं प्राप्तुमीहते। तत्प्राप्तिश्च साङ्गवेदाध्ययनेनैव सम्भवति। **"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति"**[3] इति कथनात् भाष्यकृद्भिरपि साङ्गवेदाध्ययनं समर्थितम्।

**वेदाङ्गानि तावत् -**

> **"शिक्षा व्याकरणं छन्दो निरुक्तं ज्यौतिषं तथा।**
> **कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः"॥**[4]

शिक्षा, व्याकरणम्, छन्दः, निरुक्तम्, ज्योतिषम्, कल्पश्चेति। किन्तु एतेष्वपि मुख्यं व्याकरणमेव। हरिणाप्युक्तम् – **" प्रथमं छन्दसामङ्गं प्राहुः व्याकरणं बुधाः"**[5] इति।

प्रधानञ्च षट्स्वङ्गेषु व्याकरणमिति भाष्यात्, "पवित्रं सर्वविद्यानाधिविद्यं प्रकाशते" इति हरिवचनाच्च साङ्गवेदमित्यत्राङ्गपदस्योपकारार्थकत्वाद् व्याकरणशास्त्रस्य वेदोपकारकत्वाद् निखिलशास्त्रोपकार-कत्वाच्च व्याकरणज्ञानं सुतराम् आवश्यकम्। किञ्च -

> **"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
> **ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥**
> **शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
> **तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते"॥**[6]

इत्यादिना वेदोपकारकाणां सर्वेषाम् अध्ययनं विहितम्, तथापि व्याकरणस्य प्राधान्यमत्रापि प्रतिपादित-मेव।

शरीरावयवेषु मुखस्य प्राधान्यवत्, वेदोपकारकेष्वप्यङ्गेषु व्याकरणस्य प्राधान्यात् तदध्ययनमावश्यकमिति स्वीकृतं सूरिभिः ।

**व्याकरणशब्दविचारः-**

व्याकरणशब्दस्य का व्युत्पत्तिः इति चेत् विचार्यते - व्याकृतिः व्युत्पत्तिः, तत्साधनं व्याकरणम् । आहोश्वित् व्याक्रियन्ते = व्युत्पाद्यन्ते असाधुशब्देभ्यो विविच्य शब्दा अनेनेति शब्दज्ञानजनकं व्याकरणम्। अत्र वि + आङ्-उपसर्गकात् कृधातोः करणल्युडन्तमिदं व्याकरणपदम्। किञ्च शब्दपदेनात्र साधुशब्दा एव गृह्येरन्, न त्वसाधुशब्दाः। व्याकरणन्नाम किमिति चेत्, तदुक्तं भाष्ये-

**"लक्ष्यलक्षणे व्याकरणमिति"**[7]।

अस्मिन् व्याकरणसम्प्रदाये बृहस्पत्यादयोऽनेके वैयाकरणा बभूवुः। तेषां व्याकरणान्यपि ऐन्द्रचान्द्रादीनि अनेकान्यासन् इति श्रूयते। परमेतेषु लौकिकालौकिकसाधारणं सर्वशब्दव्युत्पादकं पाणिनीयमेव व्याकरणम् इति तस्यैव वेदाङ्गत्वमिति। तदुक्तम्-

**"पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।**
**सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यन्न किञ्चन"**।।

इति पाणिनीयमेव व्याकरणं सर्वोपरि विद्यते। किञ्चेदमपि बहुधा श्रुतम् – "काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्" इति। एतेन सर्वेण पाणिनीयं प्राधान्यं भजते इति सुस्पष्टम्।

**शब्दस्य द्वैविध्यम् -**

व्याक्रियन्ते शब्दाः अनेनेत्यत्र, कोऽयं शब्दः इति चेदुक्तम् **"येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः"**[8] इति। स च शब्दः द्विविधः। धर्मजनकोऽधर्मजनकश्चेति। तत्र धर्मजनकशब्दानां ज्ञानं व्याकरणाधीनम्। उक्तं हि –**"एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग् भवति"**[9] इति।

एवञ्च इदं व्याकरणं साधुत्वसम्पादकं पुण्यजननयोग्यताधायकञ्च। साधुत्वञ्च पुण्यजनकतावच्छेदकजातिविशेषः। यतः इदं पाणिनीय-व्याकरणं महेश्वरप्रसादलब्धचतुर्दशसूत्रमूलकम्, अत एवास्यैव वेदाङ्गत्वम्। किञ्च माहेश्वराणाम् एतेषां चतुर्दशसूत्राणां पारायणे पुण्यावाप्तिश्च भवति।

**व्याकरणाध्ययनस्य किं प्रयोजनम् ? -**

अथेदानीं व्याकरणाध्ययनस्य किं प्रयोजनमिति विचारयितुम् अवशिष्यते। शब्दानुशासनं व्याकरणस्य अन्वर्थसञ्ज्ञा। अनुशिष्यन्ते अशाधुशब्देभ्यो विविच्य ज्ञाप्यन्ते साधुशब्दाः अनेनेति करणल्युडन्तत्वात् शास्त्रपदेन सामानाधिकरण्याच्छब्दानुशासनं नाम शास्त्रं बोध्यते। व्याकरणस्य अन्वर्थसञ्ज्ञया व्याकरणाध्ययनस्य शब्दानुशासनमेव साक्षात्प्रयोजनमित्याहुः भाष्यकृतः। प्रयोजन-प्रयोजनानि तावत् कानि इति प्रश्ने भाष्यकृद्भिरुच्यते- **"रक्षोहागमलघ्वसन्देहाः प्रयोजनम्"**[10] इति। व्याकरणाध्ययनं किं सन्ध्योपासनवन्नित्यं कर्म, आहोश्वित् काम्यं कर्मेति प्रश्नस्य आशयः। अत्र प्रयोजनशब्दः, प्रयोजकश्च प्रयोजनश्चेति विग्रहे **"नपुंसकमनपुंसकेनैकवच्चान्यतरस्याम्"**[11] इति शास्त्रेणैकशेषः, यः शिष्यते स लुप्यमानार्थाभिधायीति कृत्वा प्रयोजकार्थपरोऽपि। कर्मणि नित्यत्वञ्च अकरणेऽपायजनकत्वे सति करणे फलविशेषाजनकत्वम् इति ग्राह्यम्। एवं काम्यत्वमपि अननुष्ठाने प्रत्यवायासाधनत्वे सति अनुष्ठाने फलविशेषसाधनत्वमिति ग्राह्यम् । एवमननुष्ठाने पापजनकत्वे सति करणे फलविशेषजनकत्वं नैमित्तिकत्वमिति बोध्यम्।

**पञ्च मुख्यप्रयोजनानि-**

व्याकरणाध्ययनस्य मुख्यतया पञ्चप्रयोजनानि निगदितानि भाष्यकृद्भिः। तान्यधुना विचार्यन्ते।

**१.रक्षा -**

रक्षार्थं वेदानाम् अध्येयं व्याकरणम्। **"लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यति"**[12] इति। अर्थाल्लौकिके लोपादीनां सम्यगवगमात्, वेदे चादर्शनाद् भ्रान्तिः अवैयाकरणानां स्यात्, किन्तु वैयाकरणानां कथमपि भ्रान्तिः न जायते, तेन वेदार्थस्य चावधारणात् स्पष्टमवगम्यते यद् वेदस्य रक्षाफलकं व्याकरणाध्ययनम् इति।

**२.ऊहः -**

ऊहार्थमपि व्याकरणाध्ययनमावश्यकम्। तथा च **"यस्मिन् यागे इतिकर्त्तव्यतोपदिष्टा यागान्तरेणोपजीव्यते, सा प्रकृतिः, येनोपजीव्यते सा विकृतिः"**[13] कर्तव्या इति यज्ञगतेन पुरुषेण प्रकृतिप्रत्ययादीनाम् ऊहः कर्तव्यः। यथा "अग्नये त्वा जुष्टं निर्वपामि" इत्यत्र, "सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः" इति सौर्यचरौ मन्त्रः ऊह्यते "सूर्याय त्वा जुष्टं निर्वपामि" इति । वेदे तावत् न सर्वैः लिङ्गैः न च सर्वाभिः विभक्तिः मन्त्राः निगदिताः। तदेवम् असर्वविभक्तिकेऽसर्वलिङ्गके मन्त्रे लिङ्गविभक्त्यादीनाम् ऊहः कर्त्तव्यः। तच्च व्याकरणाध्येत्रा एव शाक्यम्। अतः ऊहार्थं व्याकरणमध्येयम्।

**३.आगमः-**

आगमः खल्वपि व्याकरणाध्ययनस्य प्रयोजकः। आगम्येते प्रमीयेते हिताहितप्राप्तिपरिहारावनेनेति "आगमः"। अत्र प्रयोजनशब्दस्यैक-शेषशिष्टत्वात् प्रयोजकार्थत्वमपि स्वीकृतम्। अत्रोच्यते "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति श्रुतिः । अत्र ब्राह्मणेनेत्युक्त्या क्षत्रियादीनां साङ्गवेदाध्ययनं तज्ज्ञानञ्च काम्यं कर्मेत्यवगम्यते। षट्स्वङ्गेषु व्याकरणस्य प्रधानत्वात्, प्रधाने कृतस्य यत्नस्य फलवत्वाच्च व्याकरणाध्ययनं कर्तव्यत्वेन विधीयते। तथा च

व्याकरणं वेदवदार्थज्ञानं प्रति मुख्यं कारणम् । शिक्षाद्यतिरिक्ताङ्गानां तु परम्परया पदपदार्थबोधोपयोगित्वेन गौणत्वम्।

**४.लघु -**

लाघवेन प्रतिपदपाठापेक्षया प्रकृतिप्रत्ययादिविभागान्वाख्यानेन शब्दज्ञानं व्याकरणस्य प्रयोजनम् । तदुक्तम्- **"ब्राह्मणेनावश्यं शब्दाः ज्ञेया"**[14] इति। ब्राह्मणस्याध्यापनं वृत्तिः। नह्यशब्दज्ञं ब्राह्मणमुपश्लिष्यन्ति शिष्याः। स्वजीविकाचालनाय साधुशब्दज्ञानस्यापेक्षिततया तस्य प्रतिपदपाठादिना दुस्साध्यत्वात्तदर्थं लघूपायेन शब्दज्ञानाय व्याकरणमध्येयम् ।

**असन्देहः -**

**"असन्देहार्थञ्चाध्येयं व्याकरणम्"**[15] इति। अत्र सन्देहस्य प्रागभावः ज्ञातव्यः, न तु प्रध्वंसाभावः। न हि वैयाकरणस्य संशय उत्पद्य विनश्यति, इतरस्यैव संशयोत्पादात्। "याज्ञिकाः पठन्ति स्थूलवृषतीमाग्निवारुणीम् अनड्वाहीमालभेतेति" श्रुतौ सन्देहः। तथा हि- स्थूला चासौ पृषती च स्थूलपृषती इति तत्पुरुषो वा उत स्थूलानि पृषन्ति यस्याः सा स्थूलपृषतीति बहुव्रीहिर्वा इति सन्देहः। तान्नावैयाकरणः स्वरतोऽध्यवस्यति। यदि **"बहुव्रीहौ प्रकृत्या पूर्वपदमिति"**[16] सूत्रेण पूर्वपदप्रकृतिस्वरत्वम्, ततो बहुव्रीहिः, अथ **"समासस्य"**[17] इति सूत्रेण समासान्तोदात्तत्वं ततस्तत्पुरुषकर्मधारयः। अतः असन्देहार्थं व्याकरणमध्येयम्।

व्याकरणाध्ययनस्य मुख्यानि प्रयोजनान्युक्त्वा आनुषङ्गिकाणि त्रयोदशप्रयोजनान्यप्युक्तानि "तेऽसुराः..", "दुष्टः शब्दः" इत्यादिना। तान्यत्र विस्तरभयात् न व्याख्यायन्ते।

पुनश्च न केवलं धर्मार्जनकर्तृभिः व्याकरणमध्येयम्, अपि तु शब्दमात्रमधिजिगांसमानैः सर्वैरध्येतव्यम्। अत एव -

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।**
**वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ।।**

इति शक्तिग्राहकेषु व्याकरणस्य प्राधान्येनोपादानम्। तस्मात् शक्तिग्रहं विना शाब्दबोधासम्भवेनाध्ययमात्रस्यैव वैयर्थ्यापत्तिरिति अवश्यमध्येयं व्याकरणम्।

**वक्तव्यम् -**

आतश्च प्रकृतिप्रत्ययार्थज्ञानेन नेदं व्याकरणं वेदार्थज्ञानमात्रजनकम्, अपि तु शब्दसाधुत्वज्ञानेन साक्षाच्छब्दब्रह्मसाक्षात्कारजनकत्वात् अपवर्गद्वारमपि। तदेवं विभिन्नविचारपर्यालोचनेन व्याकरणशास्त्रस्य मानवजीवने महदुपकारित्वं निश्चित्य, तदध्ययनमवश्यं कर्त्तव्यमिति वैयाकरणानाम् आकूतम्। अत्र तावत् विस्तरभयात् व्याख्यानादिगतविचारान् अस्पृष्ट्वा, अतिलघुना वाचसा व्याकरणाध्ययनप्रयोजनविषयः न्यरूपि। इति शम्।

**पादटिप्पणी -**

1 महाभारतस्य आदिपर्वणि
2 सांख्यकारिका १.श्लोकः
3 महाभाष्यं पस्पशाह्निकम्
4 मुण्डकोपनिषद्
5 वाक्यपदीयम् – १/११
6 पाणिनीयशिक्षा श्लोक-४१ तथा ४२
7 महाभाष्यं पस्पशाह्निकम्
8 महाभाष्यं पस्पशाह्निकम्
9 महाभाष्यं पस्पशाह्निकस्य प्रदीपव्यख्याने
10 महाभाष्यं पस्पशाह्निकम्
11 पा.सू. १/२/६९
12 महाभाष्यं पस्पशाह्निकम्
13 महाभाष्यस्य पस्पशाह्निकस्य प्रदीपव्याख्याने
14 महाभाष्यं पस्पशाह्निकम्
15 महाभाष्यपस्पशाह्निकम्
16 पा.सू. ६/२/१
17 पा.सू. ६/४/२२३